## २२. पुत्राभ्यां सह जनन्याः सम्भाषणम्

चतुर्थी/ तुमुन्

पुत्रः - अम्ब ! कोऽपि भिक्षुकः आगतवान्।

माता - भवान् एव तस्मै एकं नाणकं ददातु।

पुत्रः - अहं पठामि भोः, भवती एव भिक्षुकाय ददातु।

माता - भवते कार्यं न रोचते। अहमेव करोमि सर्वं कार्यम्।

पुत्रः - भिक्षुकः नाणकं नेच्छति। ओदनम् इच्छति।

माता - अहम् भिक्षुकाय ददामि। भवान् जलं पूरयतु।

पुत्रः - जलं पूरयामि। खादितुं मह्यमपि किमपि ददातु।

माता - भवते भोजनमेव ददामि। पञ्चनिमेषान् तिष्ठतु।

पुत्रः - भोजनम् अनन्तरम्। प्रातः भगिन्यै भवती यत् दत्तवती तत् मह्यम् अपि ददातु।

माता - भवान् केवलं खादति, न पठति, न वा कार्यं करोति।

पुत्रः - अम्ब ! भवती भोजनं कृत्वा कुत्र गच्छति ?

माता - अहं सार्वजनिक पुस्तकालयं गच्छामि।

दीप्तिः - अम्ब ! माम् अपि पुस्तकालयं नयतु। अहं द्रष्टुम् इच्छामि।

माता - अस्तु अद्य दशवादने गच्छामः।

दीप्तिः - अम्ब ! एतानि पुस्तकानि किमर्थम् अत्र स्थापितवन्तः ?

माता - केचन पुस्तकानि द्रष्टुम् इच्छन्ति। केचन क्रेतुम् इच्छन्ति। क्रेतुं ये इच्छन्ति ते केवलं बहिः पुस्तकानि पश्यन्ति।

दीप्तिः - प्रबन्धं लेखितुम् अपि इतः पुस्तकानि नयन्ति किम् ?

माता - अत्र सर्वविधानि अपि पुस्तकानि भवन्ति। केचन कथापुस्तकं पठितुम् इच्छन्ति। केचन भाषणं सज्जीकर्तुम् इच्छन्ति। अन्ये केचन बालकेभ्यः सङ्ग्रहीतुं शक्नुवन्ति। अतः सर्वाणि अपि पृथक् स्थापयन्ति।

दीप्तिः - अत्र पुस्तकानि स्वीकर्तुं किम् सदस्याः आगच्छन्ति ?

माता - आम् ! अत्र सा व्यवस्था समीचीना अस्ति। नूतनानि स्वीकर्तुम् पुरातनानि पुस्तकानि प्रत्यर्पयितुं सदस्याः आगच्छन्ति।

दीप्तिः - तर्हि वयं सख्यः मिलित्वा अत्र आगच्छामः। अधिकान् विषयान् सङ्ग्रहीतुं शक्नुमः।

माता - अनुजमपि आनयतु। सोऽपि पुस्तकपठनाभ्यासं करिष्यति।